

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता — क्रम पाठः

## प्रथमकाण्डे चतुर्थः प्रश्नः

### सुत्यादिने कर्तव्या ग्रहाः

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

आ ददे। ददे ग्रावा। ग्रावाऽसि। अस्यद्ध्वरकृत्। अद्ध्वरकृद् देवेभ्यः। अध्वरकृदित्य-
द्ध्वर—कृत्। देवेभ्यो गम्भीरम्। गम्भीरमिमम्। इममद्ध्वरम्। अद्ध्वरम् कृधि। कृध्युत्त-
मेन। उत्तमेन पविना। उत्तमेनेत्युत्—तमेन। पविनेन्द्राय। इन्द्राय सोमम्। सोमꣳ सुषुतम्।
सुषुतम् मधुमन्तम्। सुषुतमिति सु—सुतम्। मधुमन्तम् पयस्वन्तम्। मधुमन्तमिति मधु—
मन्तम्। पयस्वन्तँवृष्टिवनिम्। वृष्टिवनिमिन्द्राय। वृष्टिवनिमिति वृष्टि—वनिम्। इन्द्राय त्वा।
त्वा वृत्रघ्ने। वृत्रघ्न इन्द्राय। वृत्रघ्न इति वृत्र—घ्ने। इन्द्राय त्वा। त्वा वृत्रतुरे। वृत्रतुर इन्द्राय।
वृत्रतुर इति वृत्र—तुरे। इन्द्राय त्वा। त्वाऽभिमातिघ्ने। अभिमातिघ्न इन्द्राय। अभिमातिघ्न इत्य-
भिमाति—घ्ने। इन्द्राय त्वा। त्वा ऽऽदित्यवते। आदित्यवत इन्द्राय। आदित्यवत इत्यादित्य—
वते। इन्द्राय त्वा। त्वा विश्वदेव्यावते। विश्वदेव्यावते श्वात्राः। विश्वदेव्यावत इति विश्वदेव्य—
वते। श्वात्राः स्थ। स्थ वृत्रतुरः। वृत्रतुरो राधोगूर्ताः। वृत्रतुर इति वृत्र—तुरः। राधोगूर्ता अमृ-
तस्य। राधोगूर्ता इति राधः—गूर्ताः। अमृतस्य पत्नीः। पत्नीस्ताः। ता देवीः। देवीर् देवत्रा। देव-
त्रेमम्। देवत्रेति देव—त्रा। इमँय्यज्ञम्। यज्ञम् धत्त। धत्तोपहूताः। उपहूताः सोमस्य। उपहूता
इत्युप—हूताः। सोमस्य पिबत। पिबतोपहूतः। उपहूतो युष्माकम्। उपहूत इत्युप—हूतः।
युष्माकꣳ सोमः। ॥ [१] ॥ सोमः पिबतु। पिबतु यत्। यत् ते। ते सोम। सोम दिवि। दिवि
ज्योतिः। ज्योतिर् यत्। यत् पृथिव्याम्। पृथिव्याँय्यत्। यदुरौ। उरावन्तरिक्षे। अन्तरिक्षे

तेन। तेनास्मै। अस्मै यजमानाय। यजमानायोरु। उरु राया। राया कृधि। कृध्यधि। अधि दात्रे। दात्रे वोचः। वोचो धिषणे। धिषणे वीडू। धिषणे इति धिषणे। वीडू सती। वीडू इति वीडू। सती वीडयेथाम्। सती इति सती। वीडयेथामूर्जम्। ऊर्जम् दधाथाम्। दधाथामूर्जम्। ऊर्जम् मे। मे धत्तम्। धत्तम् मा। मा वाम्। वाꣳ हिꣳसिषम्। हिꣳसिषम् मा। मा मा। मा हिꣳसिष्टम्। हिꣳसिष्टम् प्राक्। प्रागपाक्। अपागुदक्। उदगधराक्। अधराक्ताः। ता स्त्वा। त्वा दिशः। दिश आ। आ धावन्तु। धावन्त्वम्ब। अम्ब नि। नि ष्वर। स्वरेति स्वर॥ यत् ते। ते सोम। सोमादाभ्यम्। अदाभ्यम् नाम। नाम जागृवि। जागृवि तस्मै। तस्मै ते। ते सोम। सोम सोमाय। सोमाय स्वाहा। स्वाहेति स्वाहा॥ ॥ [२] ॥

(युष्माकꣳ स्वर यत्ते नव च) ॥ १ ॥

वाचस्पतये। पतये पवस्व। पवस्व वाजिन्न्। वाजिन् वृषा। वृषा वृष्णः। वृष्णो अꣳशुभ्याम्। अꣳशुभ्याम् गभस्तिपूतः। अꣳशुभ्यामित्यꣳशु—भ्याम्। गभस्तिपूतो देवः। गभस्तिपूत इति गभस्ति—पूतः। देवो देवानाम्। देवानाम् पवित्रम्। पवित्रमसि। असि येषाम्। येषाम् भागः। भागोऽसि। असि तेभ्यः। तेभ्यस्त्वा। त्वा स्वाङ्कृतः। स्वाङ्कृतोऽसि। असि मधुमतीः। मधुमतीर् नः। मधुमतीरिति मधु—मतीः। न इषः। इषस्कृधि। कृधि विश्वेभ्यः। विश्वेभ्यस्त्वा। त्वेन्द्रियेभ्यः। इन्द्रियेभ्यो दिव्येभ्यः। दिव्येभ्यः पार्थिवेभ्यः। पार्थिवेभ्यो मनः। मनस्त्वा। त्वाऽष्टु। अष्टूरु। उर्वन्तरिक्षम्। अन्तरिक्षमनु। अन्विहि। इहि स्वाहा। स्वाहा त्वा। त्वा सुभवः। सुभवः सूर्याय। सुभव इति सु—भवः। सूर्याय देवेभ्यः। देवेभ्यस्त्वा। त्वा मरीचि-पेभ्यः। मरीचिपेभ्य एषः। मरीचिपेभ्य इति मरीचि—पेभ्यः। एष ते। ते योनिः। योनिः प्राणाय। प्राणाय त्वा। प्राणायेति प्र—अनाय। त्वेति त्वा॥ ॥ [३] ॥

(वाचःसप्तचत्वारिꣳशत्) ॥ २ ॥

उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। अस्यन्तः। अन्तर् यच्छ। यच्छ मघवन्न्। मघवन् पाहि। मघवन्निति मघ—वन्न्। पाहि सोमम्। सोममुरुष्य। उरुष्य रायः।

रायः सम्। समिषः। इषो यजस्व। यजस्वान्तः। अन्तस्ते। ते दधामि। दधामि द्यावापृथिवी। द्यावापृथिवी अन्तः। द्यावापृथिवी इति द्यावा—पृथिवी। अन्तरुरु। उर्वन्तरिक्षम्। अन्तरिक्षꣳ सजोषाः। सजोषा देवैः। सजोषा इति स—जोषाः। देवैरवरैः। अवरैः परैः। परैश्च। चान्तर्यामे। अन्तर्यामे मघवन्न्। अन्तर्याम इत्यन्तः—यामे। मघवन् मादयस्व। मघवन्निति मघ—वन्न्। मादयस्व स्वाङ्कृतः। स्वाङ्कृतोऽसि। असि मधुमतीः। मधुमतीर् नः। मधुमतीरिति मधु—मतीः। न इषः। इषस्कृधि। कृधि विश्वेभ्यः। विश्वेभ्यस्त्वा। त्वेन्द्रियेभ्यः। इन्द्रियेभ्यो दिव्येभ्यः। दिव्येभ्यः पार्थिवेभ्यः। पार्थिवेभ्यो मनः। मनस्त्वा। त्वाऽष्टु। अष्टूरु। उर्वन्तरिक्षम्। अन्तरिक्षमनु। अन्विहि। इहि स्वाहा। स्वाहा त्वा। त्वा सुभवः। सुभवः सूर्याय। सुभव इति सु—भवः। सूर्याय देवेभ्यः। देवेभ्यस्त्वा। त्वा मरीचिपेभ्यः। मरीचिपेभ्य एषः। मरीचिपेभ्य इति मरीचि—पेभ्यः। एष ते। ते योनिः। योनिरपानाय। अपानाय त्वा। अपानायेत्यप—अनाय। त्वेति त्वा॥ ॥ [४] ॥

(देवेभ्यःसप्त च) ॥ ३ ॥

आ वायो। वायो भूष। वायो इति वायो। भूष शुचिपाः। शुचिपा उप। शुचिपा इति शुचि—पाः। उप नः। नः सहस्रम्। सहस्रम् ते। ते नियुतः। नियुतो विश्ववार। नियुत इति नि—युतः। विश्ववारेति विश्व—वार॥ उपो ते। उपो इत्युपो। ते अन्धः। अन्धो मद्यम्। मद्यमयामि। अयामि यस्य। यस्य देव। देव दधिषे। दधिषे पूर्वपेयम्। पूर्वपेयमिति पूर्व—पेयम्॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असि वायवे। वायवे त्वा। त्वेन्द्रवायू। इन्द्रवायू इमे। इन्द्रवायू इतीन्द्र—वायू। इमे सुताः। सुता इति सुताः॥ उप प्रयोभिः। प्रयोभिरा। प्रयोभिरिति प्रयः—भिः। आ गतम्। गतमिन्दवः। इन्दवो वाम्। वामुशन्ति। उशन्ति हि। हीति हि॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असीन्द्रवायुभ्याम्। इन्द्रवायुभ्याम् त्वा। इन्द्रवायुभ्यामितीन्द्रवायु—भ्याम्। त्वैषः। एष ते। ते योनिः। योनिः सजोषाभ्याम्। सजोषाभ्याम् त्वा। सजोषाभ्यामिति स—जोषाभ्याम्। त्वेति त्वा॥ ॥ [५] ॥

(आ वायो त्रिचत्वारिꣳशत्) ॥ ४ ॥

अयव्ँवाम्। वाम् मित्रावरुणा। मित्रावरुणा सुतः। मित्रावरुणेति मित्रा—वरुणा। सुतः सोमः। सोम ऋतावृधा। ऋतावृधेत्यृत—वृधा॥ ममेत्। इदिह। इह श्रुतम्। श्रुतꣳ हवम्। हवमिति हवम्॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असि मित्राव-रुणाभ्याम्। मित्रावरुणाभ्याम् त्वा। मित्रावरुणाभ्यामिति मित्रा—वरुणाभ्याम्। त्वैषः। एष ते। ते योनिः। योनिर्ऋतायुभ्याम्। ऋतायुभ्याम् त्वा। ऋतायुभ्यामित्यृतायु—भ्याम्। त्वेति त्वा॥ ॥ [६] ॥

(अयव्ँवां विꣳशतिः) ॥ ५ ॥

या वाम्। वाम् कशा। कशा मधुमती। मधुमत्यश्विना। मधुमतीति मधु—मती। अश्विना सूनृतावती। सूनृतावतीति सूनृता—वती॥ तया यज्ञम्। यज्ञम् मिमिक्षतम्। मिमिक्षतमिति मिमिक्षतम्॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। अस्यश्विभ्याम्। अश्विभ्याम् त्वा। अश्विभ्यामित्यश्वि—भ्याम्। त्वैषः। एष ते। ते योनिः। योनिर् माद्ध्वीभ्याम्। माद्ध्वीभ्याम् त्वा। त्वेति त्वा॥ ॥ [७] ॥

(या वा मष्टादश) ॥ ६ ॥

प्रातर्युजौ वि। प्रातर्युजाविति प्रातः—युजौ। वि मुच्येथाम्। मुच्येथामश्विनौ। अश्विनावा। एह। इह गच्छतम्। गच्छतमिति गच्छतम्॥ अस्य सोमस्य। सोमस्य पीतये। पीतय इति पीतये॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। अस्यश्विभ्याम्। अश्विभ्याम् त्वा। अश्विभ्यामित्यश्वि—भ्याम्। त्वैषः। एष ते। ते योनिः। योनिरश्विभ्याम्। अश्विभ्याम् त्वा। अश्विभ्यामित्यश्वि—भ्याम्। त्वेति त्वा॥ ॥ [८] ॥

(प्रातर्युजावेकान्न विꣳशतिः) ॥ ७ ॥

अयव्ँवेनः। वेनश्चोदयत्। चोदयत् पृश्निगर्भाः। पृश्निगर्भा ज्योतिर्जरायुः। पृश्निगर्भा इति पृश्नि—गर्भाः। ज्योतिर्जरायू रजसः। ज्योतिर्जरायुरिति ज्योतिः—जरायुः। रजसो विमाने। विमान इति वि—माने॥ इममपाम्। अपाꣳ सङ्गमे। सङ्गमे सूर्यस्य। सङ्गम इति सम्—गमे। सूर्यस्य शिशुम्। शिशुन्न। न विप्राः। विप्रा मतिभिः। मतिभी रिहन्ति। मतिभिरिति मति—भिः। रिहन्तीति रिहन्ति॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असि शण्डाय। शण्डाय त्वा। त्वैषः। एष ते। ते योनिः। योनिर् वीरताम्। वीरताम् पाहि। पाहीति पाहि॥ ॥ [९] ॥

(अयव्ँवेनः पञ्चविꣳशतिः) ॥ ८ ॥

तम् प्रत्नथा। प्रत्नथा पूर्वथा। पूर्वथा विश्वथा। विश्वथेमथा। इमथा ज्येष्ठतातिम्। ज्येष्ठतातिम् बर्हिषदम्। ज्येष्ठतातिमिति ज्येष्ठ—तातिम्। बर्हिषदꣳ सुवर्विदम्। बर्हिषदमिति बर्हि—सदम्। सुवर्विदम् प्रतीचीनम्। सुवर्विदमिति सुवः—विदम्। प्रतीचीनव्ँवृजनम्। वृजनम् दोहसे। दोहसे गिरा। गिराऽऽशुम्। आशुम् जयन्तम्। जयन्तमनु। अनु यासु। यासु वर्द्धसे। वर्द्धस इति वर्द्धसे॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असि मर्काय। मर्काय त्वा। त्वैषः। एष ते। ते योनिः। योनिः प्रजाः। प्रजाः पाहि। प्रजा इति प्र—जाः। पाहीति पाहि॥ ॥ [१०] ॥

(तं प्रत्नथाषड्विꣳशतिः) ॥ ९ ॥

ये देवाः। देवा दिवि। दिव्येकादश। एकादश स्थ। स्थ पृथिव्याम्। पृथिव्यामधि। अद्ध्येकादश। एकादश स्थ। स्थाप्सुषदः। अप्सुषदो महिना। अप्सुषद इत्यप्सु—सदः। महिनैकादश। एकादश स्थ। स्थ ते। ते देवाः। देवा यज्ञम्। यज्ञमिमम्। इमम् जुषद्ध्वम्। जुषद्ध्वमुपयामगृहीतः। उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। अस्याग्रयणः। आग्रयणोऽसि। असि स्वाग्रयणः। स्वाग्रयणो जिन्व। स्वाग्रयण इति सु—आग्रयणः। जिन्व यज्ञम्।

यज्ञम् जिन्व। जिन्व यज्ञपतिम्। यज्ञपतिमभि। यज्ञपतिमिति यज्ञ—पतिम्। अभि सवना। सवना पाहि। पाहि विष्णुः। विष्णुस्त्वाम्। त्वाम् पातु। पातु विशम्। विशम् त्वम्। त्वम् पाहि। पाहीन्द्रियेण। इन्द्रियेणैषः। एष ते। ते योनिः। योनिर् विश्वेभ्यः। विश्वेभ्यस्त्वा। त्वा देवेभ्यः। देवेभ्य इति देवेभ्यः॥ ॥ [११] ॥

(ये देवास्त्रिचत्वारिंशत्) ॥ १० ॥

त्रिंशत् त्रयः। त्रयश्च। च गणिनः। गणिनो रुजन्तः। रुजन्तो दिवम्। दिवꣳ रुद्राः। रुद्राः पृथिवीम्। पृथिवीम् च। च सचन्ते। सचन्त इति सचन्ते॥ एकादशासो अप्सुषदः। अप्सु-षदः सुतम्। अप्सुषद इत्यप्सु—सदः। सुतꣳ सोमम्। सोमम् जुषन्ताम्। जुषन्ताꣳ सवनाय। सवनाय विश्वे। विश्व इति विश्वे॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। अस्याग्रयणः। आग्रयणोऽसि। असि स्वाग्रयणः। स्वाग्रयणो जिन्व। स्वाग्रयण इति सु—आग्रयणः। जिन्व यज्ञम्। यज्ञम् जिन्व। जिन्व यज्ञपतिम्। यज्ञपतिमभि। यज्ञपतिमिति यज्ञ—पतिम्। अभि सवना। सवना पाहि। पाहि विष्णुः। विष्णुस्त्वाम्। त्वाम् पातु। पातु विशम्। विशम् त्वम्। त्वम् पाहि। पाहीन्द्रियेण। इन्द्रियेणैषः। एष ते। ते योनिः। योनिर् विश्वेभ्यः। विश्वेभ्यस्त्वा। त्वा देवेभ्यः। देवेभ्य इति देवेभ्यः॥ ॥ [१२] ॥

(त्रिꣳशत्त्रयोद्विचत्वारिꣳशत्) ॥ ११ ॥

उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असीन्द्राय। इन्द्राय त्वा। त्वा बृहद्वते। बृहद्वते वयस्वते। बृहद्वत इति बृहत्—वते। वयस्वत उक्थायुवे। उक्थायुवे यत्। उक्थायुव इत्युक्थ—युवे। यत्ते। त इन्द्र। इन्द्र बृहत्। बृहद् वयः। वयस्तस्मै। तस्मै त्वा। त्वा विष्णवे। विष्णवे त्वा। त्वैषः। एष ते। ते योनिः। योनिरिन्द्राय। इन्द्राय त्वा। त्वोक्थायुवे। उक्थायुव इत्युक्थ—युवे॥ ॥ [१३] ॥

(उपयामगृहीतोऽसीन्द्रायद्वाविꣳशतिः) ॥ १२ ॥

मूर्धानम् दिवः। दिवो अरतिम्। अरतिम् पृथिव्याः। पृथिव्या वैश्वानरम्। वैश्वानरमृताय। ऋताय जातम्। जातमग्निम्। अग्निमित्यग्निम्॥ कविꣳ सम्राजम्। सम्राजमतिथिम्। सम्राजमिति सम्—राजम्। अतिथिम् जनानाम्। जनानामासन्न्। आसन्ना। आ पात्रम्। पात्रम् जनयन्त। जनयन्त देवाः। देवा इति देवाः॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। अस्यग्नये। अग्नये त्वा। त्वा वैश्वानराय। वैश्वानराय ध्रुवः। ध्रुवोऽसि। असि ध्रुवक्षितिः। ध्रुवक्षितिर् ध्रुवाणाम्। ध्रुवक्षितिरिति ध्रुव—क्षितिः। ध्रुवाणाम् ध्रुवतमः। ध्रुवतमोऽच्युतानाम्। ध्रुवतम इति ध्रुव—तमः। अच्युतानामच्युतक्षित्तमः। अच्युतक्षित्तम एषः। अच्युतक्षित्तम इत्यच्युतक्षित्—तमः। एष ते। ते योनिः। योनिरग्नये। अग्नये त्वा। त्वा वैश्वानराय। वैश्वानरायेति वैश्वानराय॥ ॥ [१४] ॥

(मूर्द्धानंपञ्चत्रिꣳशत्) ॥ १३ ॥

मधुश्च। च माधवः। माधवश्च। च शुक्रः। शुक्रश्च। च शुचिः। शुचिश्च। च नभः। नभश्च। च नभस्यः। नभस्यश्च। चेषः। इषश्च। चोर्जः। ऊर्जश्च। च सहः। सहश्च। च सहस्यः। सहस्यश्च। च तपः। तपश्च। च तपस्यः। तपस्यश्च। चोपयामगृहीतः। उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असि सꣳसर्पः। सꣳसर्पोऽसि। सꣳसर्प इति सम्—सर्पः। अस्यꣳहस्पत्याय। अꣳहस्पत्याय त्वा। अꣳहस्पत्यायेत्यꣳहः—पत्याय। त्वेति त्वा॥ ॥ [१५] ॥

(मधुश्चत्रिꣳशत्) ॥ १४ ॥

इन्द्राग्नी आ। इन्द्राग्नी इतीन्द्र—अग्नी। आ गतम्। गतꣳ सुतम्। सुतम् गीर्भिः। गीर्भिर्नभः। नभो वरेण्यम्। वरेण्यमिति वरेण्यम्॥ अस्य पातम्। पातम् धिया। धियेषिता। इषितेतीषिता॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असीन्द्राग्निभ्याम्।

इ॒न्द्रा॒ग्निभ्या᳚म् त्वा। इ॒न्द्रा॒ग्निभ्या॒मिती᳚न्द्रा॒ग्नि—भ्या॒म्। त्वै॒षः। ए॒ष ते᳚। ते॒ योनिः॑। योनि॑रिन्द्रा॒-ग्निभ्या᳚म्। इ॒न्द्रा॒ग्निभ्या᳚म् त्वा। इ॒न्द्रा॒ग्निभ्या॒मिती᳚न्द्रा॒ग्नि—भ्या॒म्। त्वेति॑ त्वा॥ ॥ [१६] ॥

(इन्द्रा᳚ग्नी वि॑ꣳश॒तिः) ॥ १५ ॥

---

ओमा॑सश्चर्‌षणीधृतः। च॒र्‌ष॒णी॒धृ॒तो॒ विश्वे᳚। च॒र्‌ष॒णी॒धृ॒त॒ इति॑ चर्‌षणि—धृ॒तः॒। विश्वे॑ देवासः। दे॒वा॒स॒ आ। आ ग॑त। ग॒तेति॑ गत॥ दा॒श्वाꣳसो॑ दा॒शुषः॑। दा॒शुषः॑ सु॒तम्। सु॒त-मिति॑ सु॒तम्॥ उ॒प॒या॒मगृ॑हीतोऽसि। उ॒प॒या॒मगृ॑हीत॒ इत्यु॑पया॒म—गृ॒ही॒तः॒। अ॒सि॒ विश्वे᳚भ्यः। विश्वे᳚भ्यस्त्वा। त्वा॒ दे॒वेभ्यः॑। दे॒वेभ्य॑ ए॒षः। ए॒ष ते᳚। ते॒ योनिः॑। योनि॒र् विश्वे᳚भ्यः। विश्वे᳚भ्यस्त्वा। त्वा॒ दे॒वेभ्यः॑। दे॒वेभ्य॒ इति॑ दे॒वेभ्यः॑॥ ॥ [१७] ॥

(ओमा॑सो वि॑ꣳश॒तिः) ॥ १६ ॥

---

म॒रुत्व॑न्तवँ॒ृष॒भम्। वृ॒ष॒भवँ॒ावृ॑धा॒नम्। वा॒वृ॒धा॒नमक॑वारिम्। अक॑वारिम् दि॒व्यम्। अक॑वारि॒-मित्यक॑वा—अ॒रि॒म्। दि॒व्यꣳ शा॒सम्। शा॒समिन्द्र᳚म्। इन्द्र॒मितीन्द्र᳚म्॥ वि॒श्वा॒सा॒ह॒मव॑से। वि॒श्वा॒-सा॒ह॒मिति॑ विश्व—साह᳚म्। अव॑से॒ नूत॑नाय। नूत॑नायो॒ग्रम्। उ॒ग्रꣳ स॑हो॒दाम्। स॒हो॒दामि॒ह। स॒हो॒-दा॒मिति॑ सहः—दाम्। इ॒ह तम्। तꣳ हु॑वेम। हु॒वे॒मेति॑ हुवेम। उ॒प॒या॒मगृ॑हीतोऽसि। उ॒प॒या॒मगृ॑-हीत॒ इत्यु॑पया॒म—गृ॒ही॒तः॒। अ॒सीन्द्रा॑य। इन्द्रा॑य त्वा। त्वा॒ म॒रुत्व॑ते। म॒रुत्व॑त ए॒षः। ए॒ष ते᳚। ते॒ योनिः॑। योनि॒रिन्द्रा॑य। इन्द्रा॑य त्वा। त्वा॒ म॒रुत्व॑ते। म॒रुत्व॒त॒ इति॑ म॒रुत्व॑ते॥ ॥ [१८] ॥

(म॒रुत्व॑न्त॒ꣳ॒षड्वि॑ꣳशतिः) ॥ १७ ॥

---

इन्द्र॑ मरुत्वः। म॒रु॒त्व॒ इ॒ह। इ॒ह पा॑हि। पा॒हि॒ सोम᳚म्। सोमँ॒यथा᳚। यथा॑ शार्या॒ते। शा॒र्या॒ते॒ अपि॑बः। अपि॑बः सु॒तस्य॑। सु॒तस्येति॑ सु॒तस्य॑॥ तव॒ प्रणी॑ती। प्रणी॑ती॒ तव॑। प्रणी॑ती॒ति॒ प्र—नी॒ती॒। तव॑ शूर। शू॒र॒ शर्म॑न्न्। शर्म॒न्ना। आ वि॑वासन्ति। वि॒वा॒स॒न्ति॒ क॒वयः॑। क॒वयः॑ सुयज्ञाः।

सुयज्ञा इति सु—यज्ञाः॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असी-न्द्राय। इन्द्राय त्वा। त्वा मरुत्वते। मरुत्वत एषः। एष ते। ते योनिः। योनिरिन्द्राय। इन्द्राय त्वा। त्वा मरुत्वते। मरुत्वत इति मरुत्वते॥ ॥ [१९] ॥

(इन्द्रैकान्न त्रि॰शत्) ॥ १८ ॥

मरुत्वा॰ इन्द्र। इन्द्र वृषभः। वृषभो रणाय। रणाय पिब। पिबा सोमम्। सोममनुष्वधम्। अनुष्वधम् मदाय। अनुष्वधमित्यनु—स्वधम्। मदायेति मदाय॥ आ सिञ्चस्व। सिञ्चस्व जठरे। जठरे मद्ध्वः। मद्ध्व ऊर्मिम्। ऊर्मिम् त्वम्। त्व॰ राजा। राजाऽसि। असि प्रदिवः। प्रदिवः सुतानाम्। प्रदिव इति प्र—दिवः। सुतानामिति सुतानाम्॥ उपयामगृहीतोऽसि। उपयामगृ-हीत इत्युपयाम—गृहीतः। असीन्द्राय। इन्द्राय त्वा। त्वा मरुत्वते। मरुत्वत एषः। एष ते। ते योनिः। योनिरिन्द्राय। इन्द्राय त्वा। त्वा मरुत्वते। मरुत्वत इति मरुत्वते॥ ॥ [२०] ॥

(मरुत्वानेकान्न त्रि॰शत्) ॥ १९ ॥

महा॰ इन्द्रः। इन्द्रो यः। य ओजसा। ओजसा पर्जन्यः। पर्जन्यो वृष्टिमान्। वृष्टिमा॰ इव। वृष्टिमानिति वृष्टि—मान्। इवेतीव॥ स्तोमैर्, वथ्सस्य। वथ्सस्य वावृधे। वावृध इति वावृधे॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असि महेन्द्राय। महेन्द्राय त्वा। महेन्द्रायेति महा—इन्द्राय। त्वैषः। एष ते। ते योनिः। योनिर् महेन्द्राय। महेन्द्राय त्वा। महेन्द्रायेति महा—इन्द्राय। त्वेति त्वा॥ ॥ [२१] ॥

(महानेकान्नविं॰शतिः) ॥ २० ॥

महा॰ इन्द्रः। इन्द्रो नृवत्। नृवदा। नृवदिति नृ—वत्। आ चर्षणिप्राः। चर्षणिप्रा उत। चर्षणिप्रा इति चर्षणि—प्राः। उत द्विबर्हाः। द्विबर्हा अमिनः। द्विबर्हा इति द्वि—

बर्हाः। अमिनः सहोभिः। सहोभिरिति सहः—भिः॥ अस्मद्रियग् वावृधे। अस्मद्रियगित्यस्म—द्रियक्। वावृधे वीर्याय। वीर्यायोरुः। उरुः पृथुः। पृथुः सुकृतः। सुकृतः कर्तृभिः। सुकृत इति सु—कृतः। कर्तृभिर् भूत्। कर्तृभिरिति कर्तृ—भिः। भूदिति भूत्॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असि महेन्द्राय। महेन्द्राय त्वा। महेन्द्रायेति महा—इन्द्राय। त्वैषः। एष ते। ते योनिः। योनिर् महेन्द्राय। महेन्द्राय त्वा। महेन्द्रायेति महा—इन्द्राय। त्वेति त्वा॥ ॥ [२२] ॥

(महान् नृवथ् षड्विꣳशतिः) ॥ २१ ॥

---

कदा चन। चन स्तरीः। स्तरीरसि। असि न। नेन्द्र। इन्द्र सश्चसि। सश्चसि दाशुषे। दाशुष इति दाशुषे॥ उपोपेत्। उपोपेत्युप—उप॥ इन्नु। नु मघवन्न्। मघवन् भूयः। मघवन्निति मघ—वन्न्। भूय इत्। इन्नु। नु ते। ते दानम्। दानम् देवस्य। देवस्य पृच्यते। पृच्यत इति पृच्यते॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। अस्यादित्येभ्यः। आदित्येभ्यस्त्वा। त्वेति त्वा॥ कदा चन। चन प्र। प्र युच्छसि। युच्छस्युभे। उभे नि। उभे इत्युभे। नि पासि। पासि जन्मनी। जन्मनी इति जन्मनी॥ तुरीयादित्य। आदित्य सवनम्। सवनम् ते। त इन्द्रियम्। इन्द्रियमा। आ तस्थौ। तस्थावमृतम्। अमृतम् दिवि। दिवीति दिवि॥ यज्ञो देवानाम्। देवानाम् प्रति। प्रत्येति। एति सुम्नम्। सुम्नमादित्यासः। आदित्यासो भवत। भवता मृडयन्तः। मृडयन्त इति मृडयन्तः॥ आ वः। वोऽर्वाची। अर्वाची सुमतिः। सुमतिर् ववृत्यात्। सुमतिरिति सु—मतिः। ववृत्यादꣳहोः। अꣳहोश्चित्। चिद्या। या वरिवोवित्तरा। वरिवोवित्तरा ऽसत्। वरिवोवित्तरेति वरिवोवित्—तरा। असदित्यसत्॥ विवस्व आदित्य। आदित्यैषः। एष ते। ते सोमपीथः। सोमपीथस्तेन। सोमपीथ इति सोम—पीथः। तेन मन्दस्व। मन्दस्व तेन। तेन तृप्य। तृप्य तृप्यास्म। तृप्यास्म ते। ते वयम्। वयम् तर्पयितारः। तर्पयितारो या। या दिव्या। दिव्या वृष्टिः। वृष्टिस्तया। तया त्वा। त्वा श्रीणामि। श्रीणामीति श्रीणामि॥ ॥ [२३] ॥

(वः सप्तविꣳशतिश्च) ॥ २२ ॥

---

वाममद्य। अद्य सवितः। सवितर्वामम्। वाममु। उ श्वः। श्वो दिवेदिवे। दिवेदिवे वामम्। दिवेदिव इति दिवे—दिवे। वाममस्मभ्यम्। अस्मभ्यꣳ सावीः। अस्मभ्यमित्यस्म—भ्यम्। सावीरिति सावीः॥ वामस्य हि। हि ख्षयस्य। ख्षयस्य देव। देव भूरेः। भूरेरया। अया धिया। धिया वामभाजः। वामभाजः स्याम। वामभाज इति वाम—भाजः। स्यामेति स्याम॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असि देवाय। देवाय त्वा। त्वा सवित्रे। सवित्र इति सवित्रे॥ ॥ [२४] ॥

(वामंचतुर्विꣳशतिः) ॥ २३ ॥

अदब्धेभिः सवितः। सवितः पायुभिः। पायुभिष्ट्वम्। पायुभिरिति पायु—भिः। त्वꣳ शिवेभिः। शिवेभिरद्य। अद्य परि। परि पाहि। पाहि नः। नो गयम्। गयमिति गयम्। हिरण्यजिह्वः सुविताय। हिरण्यजिह्व इति हिरण्य—जिह्वः। सुविताय नव्यसे। नव्यसे रख्ष। रख्षा माकिः। माकिर्नः। नो अघशꣳसः। अघशꣳस ईशत। अघशꣳस इत्यघ—शꣳसः। ईशतेतीशत॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असि देवाय। देवाय त्वा। त्वा सवित्रे। सवित्र इति सवित्रे॥ ॥ [२५] ॥

(अदब्धेभिस्त्रयोविꣳशतिः) ॥ २४ ॥

हिरण्यपाणिमूतये। हिरण्यपाणिमिति हिरण्य—पाणिम्। ऊतये सवितारम्। सवितारमुप। उप ह्वये। ह्वय इति ह्वये॥ स चेत्ता। चेत्ता देवता। देवता पदम्। पदमिति पदम्॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असि देवाय। देवाय त्वा। त्वा सवित्रे। सवित्र इति सवित्रे॥ ॥ [२६] ॥

(हिरण्यपाणिंचतुर्दश) ॥ २५ ॥

सुशर्माऽसि। सुशर्मेति सु—शर्मा। असि सुप्रतिष्ठानः। सुप्रतिष्ठानो बृहत्। सुप्रतिष्ठान इति सु—प्रतिष्ठानः। बृहदुक्षे। उक्षे नमः। नम एषः। एष ते। ते योनिः। योनिर् विश्वेभ्यः। विश्वेभ्यस्त्वा। त्वा देवेभ्यः। देवेभ्य इति देवेभ्यः॥ ॥ [२७] ॥

(सुशर्माद्वादश) ॥ २६ ॥

बृहस्पतिसुतस्य ते। बृहस्पतिसुतस्येति बृहस्पति—सुतस्य। त इन्दो। इन्दो इन्द्रियावतः। इन्दो इतीन्दो। इन्द्रियावतः पत्नीवन्तम्। इन्द्रियावत इतीन्द्रिय—वतः। पत्नीवन्तम् ग्रहम्। पत्नीवन्तमिति पत्नी—वन्तम्। गहम् गृह्णामि। गृह्णाम्यग्ना(३)इ। अग्ना(३)इ पत्नीवा(३)ः। पत्नीवा(३)ः सजूः। पत्नीवा(३) इति पत्नी—वा(३)ः। सजूर् देवेन। सजूरिति स—जूः। देवेन त्वष्ट्रा। त्वष्ट्रा सोमम्। सोमम् पिब। पिब स्वाहा। स्वाहेति स्वाहा॥ ॥ [२८] ॥

(बृहस्पतिसुतस्यपञ्चदश) ॥ २७ ॥

हरिरसि। असि हारियोजनः। हारियोजनो हर्योः। हारियोजन इति हारि—योजनः। हर्योः स्थाता। स्थाता वज्रस्य। वज्रस्य भर्ता। भर्ता पृश्नेः। पृश्नेः प्रेता। प्रेता तस्य। तस्य ते। ते देव। देव सोम। सोमेष्टयजुषः। इष्टयजुषः स्तुतस्तोमस्य। इष्टयजुष इतीष्ट—यजुषः। स्तुतस्तोमस्य शस्तोक्थस्य। स्तुतस्तोमस्येति स्तुत—स्तोमस्य। शस्तोक्थस्य हरिवन्तम्। शस्तोक्थस्येति शस्त—उक्थस्य। हरिवन्तम् ग्रहम्। हरिवन्तमिति हरि—वन्तम्। ग्रहम् गृह्णामि। गृह्णामि हरीः। हरीः स्थ। स्थ हर्योः। हर्योर् धानाः। धानाः सहसोमाः। सहसोमा इन्द्राय। सहसोमा इति सह—सोमाः। इन्द्राय स्वाहा। स्वाहेति स्वाहा॥ ॥ [२९] ॥

(हरिरसिषड्विंशतिः) ॥ २८ ॥

अग्न आयूंषि। आयूंषि पवसे। पवस आ। आ सुव। सुवोर्जम्। ऊर्जमिषम्। इषम् च। च नः। न इति नः॥ आरे बाधस्व। बाधस्व दुच्छुनाम्। दुच्छुनामिति दुच्छुनाम्॥ उपया-

मगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। अस्यग्नये। अग्नये त्वा। त्वा तेजस्वते। तेजस्वत एषः। एष ते। ते योनिः। योनिरग्नये। अग्नये त्वा। त्वा तेजस्वते। तेजस्वत इति तेजस्वते॥ ॥ [३०] ॥

(अग्न आयूꣳषि त्रयोविꣳशतिः) ॥ २९ ॥

⋆

उत्तिष्ठन्नोजसा। उत्तिष्ठन्नित्युत्—तिष्ठन्। ओजसा सह। सह पीत्वा। पीत्वा शिप्रे। शिप्रे अवेपयः। शिप्रे इति शिप्रे। अवेपय इत्यवेपयः॥ सोममिन्द्र। इन्द्र चमू। चमू सुतम्। चमू इति चमू। सुतमिति सुतम्॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असीन्द्राय। इन्द्राय त्वा। त्वौजस्वते। ओजस्वत एषः। एष ते। ते योनिः। योनिरिन्द्राय। इन्द्राय त्वा। त्वौजस्वते। ओजस्वत इत्योजस्वते॥ ॥ [३१] ॥

(उत्तिष्ठन्नेकविꣳशतिः) ॥ ३० ॥

⋆

तरणिर् विश्वदर्शतः। विश्वदर्शतो ज्योतिष्कृत्। विश्वदर्शत इति विश्व—दर्शतः। ज्योतिष्कृदसि। ज्योतिष्कृदिति ज्योतिः—कृत्। असि सूर्य। सूर्येति सूर्य॥ विश्वमा। आ भासि। भासि रोचनम्। रोचनमिति रोचनम्॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असि सूर्याय। सूर्याय त्वा। त्वा भ्राजस्वते। भ्राजस्वत एषः। एष ते। ते योनिः। योनिः सूर्याय। सूर्याय त्वा। त्वा भ्राजस्वते। भ्राजस्वत इति भ्राजस्वते॥ ॥ [३२] ॥

(तरणिर्विꣳशतिः) ॥ ३१ ॥

⋆

आ प्यायस्व। प्यायस्व मदिन्तम। मदिन्तम सोम। सोम विश्वाभिः। विश्वाभिरूतिभिः। ऊतिभिरित्यूति—भिः॥ भवा नः। नः सप्रथस्तमः। सप्रथस्तम इति सप्रथः—तमः॥ ॥ [३३] ॥

(आ प्यायस्वनव) ॥ ३२ ॥

ईयुष्टे। ते ये। ये पूर्वतराम्। पूर्वतरामपश्यन्न्। पूर्वतरामिति पूर्व—तराम्। अपश्यन्,व्युच्छन्तीम्। व्युच्छन्तीमुषसम्। व्युच्छन्तीमिति वि—उच्छन्तीम्। उषसम् मर्त्यासः। मर्त्यास इति मर्त्यासः॥ अस्माभिरु। ऊ नु। नु प्रतिचक्ष्या। प्रतिचक्ष्याऽभूत्। प्रतिचक्ष्येति प्रति—चक्ष्या। अभूदो। ओ ते। ओ इत्यो। ते यन्ति। यन्ति ये। ये अपरीषु। अपरीषु पश्यान्। पश्यानिति पश्यान्॥ ॥ [३४] ॥

(ईयुरेकान्न विंशतिः) ॥ ३३ ॥

ज्योतिष्मतीम् त्वा। त्वा सादयामि। सादयामि ज्योतिष्कृतम्। ज्योतिष्कृतम् त्वा। ज्योतिष्कृतमिति ज्योतिः—कृतम्। त्वा सादयामि। सादयामि ज्योतिर्विदम्। ज्योतिर्विदम् त्वा। ज्योतिर्विदमिति ज्योतिः—विदम्। त्वा सादयामि। सादयामि भास्वतीम्। भास्वतीम् त्वा। त्वा सादयामि। सादयामि ज्वलन्तीम्। ज्वलन्तीम् त्वा। त्वा सादयामि। सादयामि मल्मलाभवन्तीम्। मल्मलाभवन्तीम् त्वा। मल्मलाभवन्तीमिति मल्मला—भवन्तीम्। त्वा सादयामि। सादयामि दीप्यमानाम्। दीप्यमानाम् त्वा। त्वा सादयामि। सादयामि रोचमानाम्। रोचमानाम् त्वा। त्वा सादयामि। सादयाम्यजस्राम्। अजस्राम् त्वा। त्वा सादयामि। सादयामि बृहज्ज्योतिषम्। बृहज्ज्योतिषम् त्वा। बृहज्ज्योतिषमिति बृहत्—ज्योतिषम्। त्वा सादयामि। सादयामि बोधयन्तीम्। बोधयन्तीम् त्वा। त्वा सादयामि। सादयामि जाग्रतीम्। जाग्रतीम् त्वा। त्वा सादयामि। सादयामीति सादयामि॥ ॥ [३५] ॥

(ज्योतिष्मतीꣳषड्विꣳशत्) ॥ ३४ ॥

प्रयासाय स्वाहा। प्रयासायेति प्र—यासाय। स्वाहा ऽऽयासाय। आयासाय स्वाहा। आयासायेत्या—यासाय। स्वाहा वियासाय। वियासाय स्वाहा। वियासायेति वि—यासाय। स्वाहा सँय्यासाय। सँय्यासाय स्वाहा। सँय्यासायेति सम्—यासाय। स्वाहोद्यासाय। उद्यासाय

स्वाहा। उद्यासायेत्युत्—यासाय। स्वाहाऽवयासाय। अवयासाय स्वाहा। अवयासायेत्यव—यासाय। स्वाहा शुचे। शुचे स्वाहा। स्वाहा शोकाय। शोकाय स्वाहा। स्वाहा तप्यत्वै। तप्यत्वै स्वाहा। स्वाहा तपते। तपते स्वाहा। स्वाहा ब्रह्महत्यायै। ब्रह्महत्यायै स्वाहा। ब्रह्महत्याया इति ब्रह्म—हत्यायै। स्वाहा सर्वस्मै। सर्वस्मै स्वाहा। स्वाहेति स्वाहा॥ ॥ [३६] ॥

(प्रयासायचतुर्विꣳशतिः) ॥ ३५ ॥

चित्तꣳ सन्तानेन। सन्तानेन भवम्। सन्तानेनेति सम्—तानेन। भवँय्यक्ना। यक्ना रुद्रम्। रुद्रम् तनिम्ना। तनिम्ना पशुपतिम्। पशुपतिꣳ स्थूलहृदयेन। पशुपतिमिति पशु—पतिम्। स्थूलहृदयेनाग्निम्। स्थूलहृदयेनेति स्थूल—हृदयेन। अग्निꣳ हृदयेन। हृदयेन रुद्रम्। रुद्रँल्लोहितेन। लोहितेन शर्वम्। शर्वम् मतस्नाभ्याम्। मतस्नाभ्याम् महादेवम्। महादेवमन्तःपार्श्वेन। महादेवमितिमहा—देवम्। अन्तःपार्श्वेनौषिष्ठहनम्। अन्तःपार्श्वेनेत्यन्तः—पार्श्वेन। ओषिष्ठहनꣳ शिङ्गीनिकोश्याभ्याम्। ओषिष्ठहनमित्यौषिष्ठ—हनम्। शिङ्गीनिकोश्याभ्यामिति शिङ्गी—निकोश्याभ्याम्॥ ॥ [३७] ॥

(चित्तमष्टादश) ॥ ३६ ॥

आ तिष्ठ। तिष्ठ वृत्रहन्न्। वृत्रहन् रथम्। वृत्रहन्निति वृत्र—हन्न्। रथँय्युक्ता। युक्ता ते। ते ब्रह्मणा। ब्रह्मणा हरी। हरी इति हरी॥ अर्वाचीनꣳ सु। सु ते। ते मनः। मनो ग्रावा। ग्रावा कृणोतु। कृणोतु वग्नुना। वग्नुनेति वग्नुना॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असीन्द्राय। इन्द्राय त्वा। त्वा षोडशिने। षोडशिन एषः। एष ते। ते योनिः। योनिरिन्द्राय। इन्द्राय त्वा। त्वा षोडशिने। षोडशिन इति षोडशिने॥ ॥ [३८] ॥

(आ तिष्ठषड्विꣳशतिः) ॥ ३७ ॥

इन्द्रमित्। इद्धरी। हरी वहतः। हरी इति हरी॥ वहतो ऽप्रतिधृष्टशवसम्। अप्रतिधृष्टशवस मृषीणाम्। अप्रतिधृष्टशवसमित्यप्रतिधृष्ट—शवसम्। ऋषीणाम् च। च स्तुतीः। स्तुतीरुप। उप यज्ञम्। यज्ञम् च। च मानुषाणाम्। मानुषाणामिति मानुषाणाम्॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असीन्द्राय। इन्द्राय त्वा। त्वा षोडशिने। षोडशिन एषः। एष ते। ते योनिः। योनिरिन्द्राय। इन्द्राय त्वा। त्वा षोडशिने। षोडशिन इति षोडशिने॥ ॥ [३९] ॥

(इन्द्रमित्त्रयोविंशतिः) ॥ ३८ ॥

असावि सोमः। सोम इन्द्र। इन्द्र ते। ते शविष्ठ। शविष्ठ धृष्णो। धृष्णवा। आ गहि। गहीति गहि॥ आ त्वा। त्वा पृणक्तु। पृणक्त्विन्द्रियम्। इन्द्रियꣳ रजः। रजः सूर्यम्। सूर्यन्न। न रश्मिभिः। रश्मिभिरिति रश्मि—भिः॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असीन्द्राय। इन्द्राय त्वा। त्वा षोडशिने। षोडशिन एषः। एष ते। ते योनिः। योनिरिन्द्राय। इन्द्राय त्वा। त्वा षोडशिने। षोडशिन इति षोडशिने॥ ॥ [४०] ॥

(असाविसप्तविꣳशतिः) ॥ ३९ ॥

सर्वस्य प्रतिशीवरी। प्रतिशीवरी भूमिः। प्रतिशीवरीति प्रति—शीवरी। भूमिस्त्वा। त्वोपस्थे। उपस्थ आ। उपस्थ इत्युप—स्थे। आऽधित। अधितेत्यधित॥ स्योनाऽस्मै। अस्मै सुषदा। सुषदा भव। सुषदेति सु—सदा। भव यच्छ। यच्छास्मै। अस्मै शर्म। शर्म सप्रथाः। सप्रथा इति स—प्रथाः॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असीन्द्राय। इन्द्राय त्वा। त्वा षोडशिने। षोडशिन एषः। एष ते। ते योनिः। योनिरिन्द्राय। इन्द्राय त्वा। त्वा षोडशिने। षोडशिन इति षोडशिने॥ ॥ [४१] ॥

(सर्वस्य षड्विꣳशतिः) ॥ ४० ॥

महाꣳ इन्द्रः। इन्द्रो वज्रबाहुः। वज्रबाहुः षोडशी। वज्रबाहुरिति वज्र—बाहुः। षोडशी शर्म। शर्म यच्छतु। यच्छत्विति यच्छतु॥ स्वस्ति नः। नो मघवा। मघवा करोतु। मघवेति मघ—वा। करोतु हन्तु। हन्तु पाप्मानम्। पाप्मानय्यँः। योँऽस्मान्। अस्मान् द्वेष्टि। द्वेष्टीति द्वेष्टि॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असीन्द्राय। इन्द्राय त्वा। त्वा षोडशिने। षोडशिन एषः। एष ते। ते योनिः। योनिरिन्द्राय। इन्द्राय त्वा। त्वा षोडशिने। षोडशिन इति षोडशिने॥ ॥ [४२] ॥

(महान्षड्विꣳशतिः) ॥ ४१ ॥

---

सजोषा इन्द्र। सजोषा इति स—जोषाः। इन्द्र सगणः। सगणो मरुद्भिः। सगण इति स—गणः। मरुद्भिः सोमम्। मरुद्भिरिति मरुत्—भिः। सोमम् पिब। पिब वृत्रहन्न्। वृत्रहञ्छूर। वृत्रहन्निति वृत्र—हन्न्। शूर विद्वान्। विद्वानिति विद्वान्॥ जहि शत्रून्। शत्रूꣳरप। अप मृधः। मृधो नुदस्व। नुदस्वाथ। अथाभयम्। अभयम् कृणुहि। कृणुहि विश्वतः। विश्वतो नः। न इति नः॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असीन्द्राय। इन्द्राय त्वा। त्वा षोडशिने। षोडशिन एषः। एष ते। ते योनिः। योनिरिन्द्राय। इन्द्राय त्वा। त्वा षोडशिने। षोडशिन इति षोडशिने॥ ॥ [४३] ॥

(सजोषास्त्रिꣳशत्) ॥ ४२ ॥

---

उदु। उ त्यम्। त्यम् जातवेदसम्। जातवेदसम् देवम्। जातवेदसमिति जात—वेदसम्। देवव्ँवहन्ति। वहन्ति केतवः। केतव इति केतवः॥ दृशे विश्वाय। विश्वाय सूर्यम्। सूर्यमिति सूर्यम्॥ चित्रम् देवानाम्। देवानामुत्। उदगात्। अगादनीकम्। अनीकम् चक्षुः। चक्षुर् मित्रस्य। मित्रस्य वरुणस्य। वरुणस्याग्नेः। अग्नेरित्यग्नेः॥ आऽप्राः। अप्रा द्यावापृथिवी। द्यावापृथिवी अन्तरिक्षम्। द्यावापृथिवी इति द्यावा—पृथिवी। अन्तरिक्षꣳ सूर्यः। सूर्य आत्मा। आत्मा जगतः। जगतस्तस्थुषः। तस्थुषश्च। चेति च॥ अग्ने नय। नय सुपथा।

सुपथा राये। सुपथेति सु—पथा। राये अस्मान्। अस्मान्विश्वानि। विश्वानि देव। देव वयुनानि। वयुनानि विद्वान्। विद्वानिति विद्वान्॥ युयोध्यस्मत्। अस्मज्जुहुराणम्। जुहुराणमेनः। एनो भूयिष्ठाम्। भूयिष्ठान्ते। ते नमउक्तिम्। नमउक्तिंविधेम। नमउक्तिमिति नमः—उक्तिम्। विधेमेति विधेम॥ दिवम् गच्छ। गच्छ सुवः। सुवः पत। पत रूपेण। रूपेण वः। ॥ [४४] ॥

वो रूपम्। रूपमभि। अभ्या। ऐमि। एमि वयसा। वयसा वयः। वय इति वयः॥ तुथो वः। वो विश्ववेदाः। विश्ववेदा वि। विश्ववेदा इति विश्व—वेदाः। वि भजतु। भजतु वर्षिष्ठे। वर्षिष्ठे अधि। अधि नाके। नाक इति नाके॥ एतत्ते। ते अग्ने। अग्ने राधः। राध आ। ऐति। एति सोमच्युतम्। सोमच्युतम् तत्। सोमच्युतमिति सोम—च्युतम्। तन्मित्रस्य। मित्रस्य पथा। पथा नय। नयर्तस्य। ऋतस्य पथा। पथा प्र। प्रेत। इत चन्द्रदक्षिणाः। चन्द्रदक्षिणा यज्ञस्य। चन्द्रदक्षिणा इति चन्द्र—दक्षिणाः। यज्ञस्य पथा। पथा सुविता। सुविता नयन्तीः। नयन्तीर् ब्राह्मणम्। ब्राह्मणमद्य। अद्य राध्यासम्। राध्यासमृषिम्। ऋषिमार्षेयम्। आर्षेयम् पितृमन्तम्। पितृमन्तम् पैतृमत्यम्। पितृमन्तमिति पितृ—मन्तम्। पैतृमत्यꣳ सुधातुदक्षिणम्। पैतृमत्यमिति पैतृ—मत्यम्। सुधातुदक्षिणव्ँवि। सुधातुदक्षिणमिति सुधातु—दक्षिणम्। वि सुवः। सुवः पश्य। पश्य वि। व्यन्तरिक्षम्। अन्तरिक्षय्ँयतस्व। यतस्व सदस्यैः। सदस्यैरस्मद्दात्राः। अस्मद्दात्रा देवत्रा। अस्मद्दात्रा इत्यस्मत्—दात्राः। देवत्रा गच्छत। देवत्रेति देव—त्रा। गच्छत मधुमतीः। मधुमतीः प्रदातारम्। मधुमतीरिति मधु—मतीः। प्रदातारमा। प्रदातारमिति प्र—दातारम्। आ विशत। विशतानवहाय। अनवहायास्मान्। अनवहायेत्यनव—हाय। अस्मान् देवयानेन। देवयानेन पथा। देवयानेनेति देव—यानेन। पथेत। इत सुकृताम्। सुकृताँल्लोके। सुकृतामिति सु—कृताम्। लोके सीदत। सीदत तत्। तन्नः। नः सꣳस्कृतम्। सꣳस्कृतमिति सꣳस्कृतम्॥ ॥ [४५] ॥

(रूपेणसदस्यैरष्टादश च) ॥ ४३ ॥

धाता रातिः। रातिः सविता। सवितेदम्। इदम् जुषन्ताम्। जुषन्ताम् प्रजापतिः। प्रजापतिर्निधिपतिः। प्रजापतिरिति प्रजा—पतिः। निधिपतिर् नः। निधिपतिरिति निधि—पतिः।

नो अग्निः। अग्निरित्यग्निः॥ त्वष्टा विष्णुः। विष्णुः प्रजया। प्रजया सꣳरराणः। प्रजयेति प्र—जया। सꣳरराणो यजमानाय। सꣳरराण इति सं—रराणः। यजमानाय द्रविणम्। द्रविणं दधातु। दधात्विति दधातु॥ समिन्द्र। इन्द्रणः। नो मनसा। मनसा नेषि। नेषि गोभिः। गोभिः सम्। सꣳ सूरिभिः। सूरिभिर् मघवन्न्। सूरिभिरिति सूरि—भिः। मघवन्थ् सम्। मघवन्निति मघ—वन्न्। सङ्ँ स्वस्त्या। स्वस्त्येति स्वस्त्या॥ सम् ब्रह्मणा। ब्रह्मणा देवकृतम्। देवकृतय्ँयत्। देवकृतमिति देव—कृतम्। यदस्ति। अस्ति सम्। सम् देवानाम्। देवानाꣳ सुमत्या। सुमत्या यज्ञियानाम्। सुमत्येति सु—मत्या। यज्ञियानामिति यज्ञियानाम्॥ सव्ँवर्चसा। वर्चसा पयसा। पयसा सम्। सम् तनूभिः। तनूभिरगन्महि। अगन्महि मनसा। मनसा सम्। सꣳ शिवेन। शिवेनेति शिवेन॥ त्वष्टा नः। नो अत्र। अत्र वरिवः। वरिवः कृणोतु। कृणोत्वनु। ॥ [४६] ॥

अनु मार्ष्टु। मार्ष्टु तनुवः। तनुवो यत्। यद् विलिष्टम्। विलिष्टमिति वि—लिष्टम्॥ यदद्य। अद्य त्वा। त्वा प्रयति। प्रयति यज्ञे। प्रयतीति प्र—यति। यज्ञे अस्मिन्न्। अस्मिन्नग्ने। अग्ने होतारम्। होतारमवृणीमहि। अवृणीमहीह। इहेतीह॥ ऋध गयाट्। अयाडृधक्। ऋधगुत। उताशमिष्ठाः। अशमिष्ठाः प्रजानन्न्। प्रजानन्यज्ञम्। प्रजानन्निति प्र—जानन्न्। यज्ञमुप। उप याहि। याहि विद्वान्। विद्वानिति विद्वान्॥ स्वगा वः। स्वगेति स्व—गा। वो देवाः। देवाः सदनम्। सदनमकर्म। अकर्म ये। य आजग्म। आजग्म सवना। आजग्मेत्या—जग्म। सवनेदम्। इदम् जुषाणाः। जुषाणा इति जुषाणाः॥ जक्षिवाꣳसः पपिवाꣳसः। पपिवाꣳसश्च। च विश्वे। विश्वेऽस्मे। अस्मे धत्त। अस्मे इत्यस्मे। धत्त वसवः। वसवो वसूनि। वसूनीति वसूनि॥ याना। आऽवहः। अवह उशतः। उशतो देव। देव देवान्। देवान् तान्। तान् प्र। ॥ [४७] ॥

प्रेरय। ईरय स्वे। स्वे अग्ने। अग्ने सधस्थे। सधस्थ इति सध—स्थे॥ वहमाना भरमाणाः। भरमाणा हवीꣳषि। हवीꣳषि वसुम्। वसुम् घर्मम्। घर्मम् दिवम्। दिवमा। आ तिष्ठत। तिष्ठतानु। अन्वित्यनु॥ यज्ञ यज्ञम्। यज्ञम् गच्छ। गच्छ यज्ञपतिम्। यज्ञपतिम् गच्छ। यज्ञपतिमिति यज्ञ—पतिम्। गच्छ स्वाम्। स्वाय्ँयोनिम्। योनिम् गच्छ। गच्छ स्वाहा। स्वाहैषः। एष ते। ते यज्ञः। यज्ञो यज्ञपते। यज्ञपते सहसूक्तवाकः। यज्ञपत इति यज्ञ—पते। सहसूक्तवाकः सुवीरः। सहसूक्तवाक इति सहसूक्त—वाकः। सुवीरः स्वाहा। सुवीर इति सु—वीरः। स्वाहा देवाः। देवा

गातुविदः। गातुविदो गातुम्। गातुविद इति गातु—विदः। गातुँव्वित्वा। वित्वा गातुम्। गातु-मित। इत मनसः। मनसस्पते। पत इमम्। इमम् नः। नो देव। देव देवेषु। देवेषु यज्ञम्। यज्ञꣳ स्वाहा। स्वाहा वाचि। वाचि स्वाहा। स्वाहा वाते। वाते धाः। धा इति धाः॥ ॥ [४८] ॥

(कृणोतुतानष्टाचत्वारिꣳशच्च) ॥ ४४ ॥

उरुꣳ हि। हि राजा। राजा वरुणः। वरुणश्चकार। चकार सूर्याय। सूर्याय पन्थाम्। पन्थामन्वेतवै। अन्वेतवा उ। अन्वेतवा इत्यनु—एतवै। उवित्यु॥ अपदे पादा। पादा प्रति-धातवे। प्रतिधातवेऽकः। प्रतिधातव इति प्रति—धातवे। अकरुत। उतापवक्ता। अपवक्ता हृदयाविधः। अपवक्तेत्यप—वक्ता। हृदयाविधश्चित्। हृदयाविध इति हृदय—विधः। चिदिति चित्॥ शतम् ते। ते राजन्न्। राजन् भिषजः। भिषजः सहस्रम्। सहस्रमुर्वी। उर्वी गम्भीरा। गम्भीरा सुमतिः। सुमतिष्टे। सुमतिरिति सु—मतिः। ते अस्तु। अस्त्वित्यस्तु॥ बाधस्व द्वेषः। द्वेषो निरृतिम्। निरृतिम् पराचैः। निरृतिमिति निः—ऋतिम्। पराचैः कृतम्। कृतम् चित्। चिदेनः। एनः प्र। प्र मुमुग्धि। मुमुग्ध्यस्मत्। अस्मदित्यस्मत्॥ अभिष्ठितो वरुणस्य। अभिष्ठित इत्यभि—स्थितः। वरुणस्य पाशः। पाशोऽग्नेः। अग्नेरनीकम्। अनीकमपः। अप आ। आ विवेश। विवेशेति विवेश॥ अपाम् नपात्। नपात् प्रतिरक्षन्न्। प्रतिरक्षन्नसुर्यम्। प्रतिरक्षन्निति प्रति—रक्षन्न्। असुर्यम् दमेदमे। दमेदमे समिधम्। दमेदम इति दमे—दमे। ॥ [४९] ॥ समिधँय्यक्षि। समिधमिति सम्—इधम्। यक्ष्यग्ने। अग्न इत्यग्ने॥ प्रति ते। ते जिह्वा। जिह्वा घृतम्। घृतमुत्। उच्चरण्येत्। चरण्येथ् समुद्रे। समुद्रे ते। ते हृदयम्। हृदयमप्सु। अप्स्वन्तः। अप्स्वित्यप्—सु। अन्तरित्यन्तः॥ सम् त्वा। त्वा विशन्तु। विशन्त्वोषधीः। ओषधीरुत। उतापः। आपो यज्ञस्य। यज्ञस्य त्वा। त्वा यज्ञपते। यज्ञपते हविर्भिः। यज्ञपत इति यज्ञ—पते। हविर्भिरिति हविः—भिः॥ सूक्तवाके नमोवाके। सूक्तवाक इति सूक्त—वाके। नमोवाके विधेम। नमोवाक इति नमः—वाके। विधेमावभृथ। अवभृथ निचङ्कुण। अवभृ-थेत्यव—भृथ। निचङ्कुण निचेरुः। निचङ्कुणेति नि—चङ्कुण। निचेरुरसि। निचेरुरिति नि—चेरुः। असि निचङ्कुण। निचङ्कुणाव। निचङ्कुणेति नि—चङ्कुण। अव देवैः। देवैर्

देवकृतम्। देवकृतमेनः। देवकृतमिति देव—कृतम्। एनोऽयाट्। अयाडव। अव मर्त्यैः। मर्त्यैर् मर्त्यकृतम्। मर्त्यकृतमुरोः। मर्त्यकृतमिति मर्त्य—कृतम्। उरोरा। आ नः। नो देव। देव रिषः। रिषस्पाहि। पाहि सुमित्राः। सुमित्रा नः। सुमित्रा इति सु—मित्राः। न आपः। आप ओषधयः। ओषधयः सन्तु। ५० (५०/६२) ॥ [५०] ॥ सन्तु दुर्मित्राः। दुर्मित्रास्तस्मै। दुर्मित्रा इति दुः—मित्राः। तस्मै भूयासुः। भूयासुर् यः। योऽस्मान्। अस्मान् द्वेष्टि। द्वेष्टि यम्। यम् च। च वयम्। वयम् द्विष्मः। द्विष्मो देवीः। देवीरापः। आप एषः। एष वः। वो गर्भः। गर्भस्तम्। तँव्वः। वः सुप्रीतम्। सुप्रीतꣳ सुभृतम्। सुप्रीतमिति सु—प्रीतम्। सुभृतमकर्म। सुभृतमिति सु—भृतम्। अकर्म देवेषु। देवेषु नः। नः सुकृतः। सुकृतो ब्रूतात्। सुकृत इति सु—कृतः। ब्रूतात्,प्रति-युतः। प्रतियुतो वरुणस्य। प्रतियुत इति प्रति—युतः। वरुणस्य पाशः। पाशः प्रत्यस्तः। प्रत्यस्तो वरुणस्य। प्रत्यस्त इति प्रति—अस्तः। वरुणस्य पाशः। पाश एधः। एधोऽसि। अस्येधिषीमहि। एधिषीमहि समित्। समिदसि। समिदिति सम्—इत्। असि तेजः। तेजोऽसि। असि तेजः। तेजो मयि। मयि धेहि। धेह्यपः। अपो अनु। अन्वचारिषम्। अचारिषꣳ रसेन। रसेन सम्। समसृक्ष्महि। असृक्ष्महीत्यसृक्ष्महि॥ पयस्वाꣳ अग्ने। अग्न आ। आऽगमम्। अगमम् तम्। तम् मा। मा सम्। सꣳ सृज। सृज वर्चसा। वर्चसेति वर्चसा॥ ॥ [५१] ॥

(दमैदमओषधय आषड्ढ) ॥ ४५ ॥

यस्त्वा। त्वा हृदा। हृदा कीरिणा। कीरिणा मन्यमानः। मन्यमानोऽमर्त्यम्। अमर्त्यम् मर्त्यः। मर्त्यो जोहवीमि। जोहवीमीति जोहवीमि॥ जातवेदो यशः। जातवेद इति जात—वेदः। यशो अस्मासु। अस्मासु धेहि। धेहि प्रजाभिः। प्रजाभिरग्ने। प्रजाभिरिति प्र—जाभिः। अग्ने अमृतत्वम्। अमृतत्वमश्याम्। अमृतत्वमित्यमृत—त्वम्। अश्यामित्यश्याम्॥ यस्मै त्वम्। त्वꣳ सुकृते। सुकृते जातवेदः। सुकृत इति सु—कृते। जातवेद उ। जातवेद इति जात—वेदः। उ लोकम्। लोकमग्ने। अग्ने कृणवः। कृणवः स्योनम्। स्योनमिति स्योनम्॥ अश्विनꣳ सः। स पुत्रिणम्। पुत्रिणँव्वीरवन्तम्। वीरवन्तम् गोमन्तम्। वीरवन्तमिति वीर—वन्तम्। गोमन्तꣳ रयिम्। गोमन्तमिति गो—मन्तम्। रयिम् नशते। नशते स्वस्ति। स्वस्तीति

स्वस्ति॥ त्वे सु। त्वे इति त्वे। सु पुत्र। पुत्र शवसः। शवसोऽवृत्रन्न्। अवृत्रन् कामकातयः। कामकातय इति काम—कातयः॥ न त्वाम्। त्वामिन्द्र। इन्द्राति। अति रिच्यते। रिच्यत इति रिच्यते॥ उक्थ,उक्थे सोमः। उक्थ,उक्थ इत्युक्थे—उक्थे। सोम इन्द्रम्। इन्द्रम् ममाद। ममाद नीथेनीथे। नीथेनीथे मघवानम्। नीथेनीथ इति नीथे—नीथे। मघवानꣳ सुतासः। मघवानमिति मघ—वानम्। ॥ [५२] ॥ सुतास इति सुतासः॥ यदीम्। ईꣳ सबाधः। सबाधः पितरम्। सबाध इति स—बाधः। पितरन्न। न पुत्राः। पुत्राः समानदक्षाः। समानदक्षा अवसे। समानदक्षा इति समान—दक्षाः। अवसे हवन्ते। हवन्त इति हवन्ते॥ अग्ने रसेन। रसेन तेजसा। तेजसा जातवेदः। जातवेदो वि। जातवेद इति जात—वेदः। वि रोचसे। रोचस इति रोचसे॥ रक्षोहा ऽमीवचातनः। रक्षोहेति रक्षः—हा। अमीवचातन इत्यमीव—चातनः॥ अपो अनु। अन्वचारिषम्। अचारिषꣳ रसेन। रसेन सम्। समसृक्ष्महि। असृक्ष्महीत्यसृक्ष्महि॥ पयस्वाꣳ अग्ने। अग्न आ। आऽगमम्। अगमन्तम्। तम् मा। मा सम्। सꣳ सृज। सृज वर्चसा। वर्चसेति वर्चसा॥ वसुर् वसुपतिः। वसुपतिर्हिकम्। वसुपतिरिति वसु—पतिः। हिकमसि। अस्यग्ने। अग्ने विभावसुः। विभावसुरिति विभा—वसुः॥ स्याम ते। ते सुमतौ। सुमतावपि। सुमताविति सु—मतौ। अपीत्यपि॥ त्वामग्ने। अग्ने वसुपतिम्। वसुपतिँव्वसूनाम्। वसुपतिमिति वसु—पतिम्। वसूनामभि। अभि प्र। प्र मन्दे। मन्दे अद्ध्वरेषु। ॥ [५३] ॥ अद्ध्वरेषु राजन्न्। राजन्निति राजन्न्॥ त्वया वाजम्। वाजँव्वाजयन्तः। वाजयन्तो जयेम। वाजयन्त इति वाज—यन्तः। जयेमाभि। अभिष्याम। स्याम पृथ्सुतीः। पृथ्सुतीर्,मर्त्यानाम्। मर्त्यानामिति मर्त्यानाम्॥ त्वामग्ने। अग्ने वाजसातमम्। वाजसातमँव्विप्राः। वाजसातममिति वाज—सातमम्। विप्रा वर्द्धन्ति। वर्द्धन्ति सुष्टुतम्। सुष्टुतमिति सु—स्तुतम्॥ स नः। नो रास्व। रास्व सुवीर्यम्। सुवीर्यमिति सु—वीर्यम्॥ अयम् नः। नो अग्निः। अग्निर्,वरिवः। वरिवः कृणोतु। कृणोत्वयम्। अयम् मृधः। मृधः पुरः। पुर एतु। एतु प्रभिन्दन्न्। प्रभिन्दन्निति प्र—भिन्दन्न्॥ अयꣳ शत्रून्। शत्रून् जयतु। जयतु जर्हृषाणः। जर्हृषाणोऽयम्। अयँव्वाजम्। वाजम् जयतु। जयतु वाजसातौ। वाजसाताविति वाज—सातौ॥ अग्निनाऽग्निः। अग्निः सम्। समिद्ध्यते। इद्ध्यते कविः। कविर् गृहपतिः। गृहपतिर् युवा। गृहपतिरिति गृह—पतिः। युवेति

युवा॑॥ ह॒व्य॒वाड्,जु॒ह्वा॑स्यः। ह॒व्य॒वाडिति॑ हव्य—वाट्। जु॒ह्वा॑स्य॒ इति॑ जु॒हु—आ॒स्यः॥ त्वꣳ हि। ह्य॑ग्ने। अ॒ग्ने॒ अ॒ग्निना॑। अ॒ग्निना॒ विप्रः॑। विप्रो॒ विप्रे॑ण। विप्रे॑ण॒ सन्न्। सन्थ् स॒ता। स॒तेति॑ स॒ता॥ सखा॒ सख्या॑। सख्या॑ स॒मि॒द्ध्यसे॑। स॒मि॒द्ध्यस॒ इति॑ सं—इ॒द्ध्यसे॑॥ उद॑ग्ने। अ॒ग्ने॒ शुच॑यः। शुच॑-य॒स्तव॑। तव॒ वि। वि ज्योति॑षा। ज्योति॒षेति॒ ज्योति॑षा॥ ॥ [५४] ॥

(म॒घवा॑नंमन्दे॒ह्य॑ग्ने॒चतु॑र्दश च) ॥ ४६ ॥

॥ हरिः ॐ ॥

प्रथमकाण्डे चतुर्थः प्रश्नः — क्रम पाठः — समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| ४६ | ५४ |

ॐ